# Yamaproktam Shivarchanopadesham 2

# યમપ્રોક્તં શિવાર્ચનોપદેશમ્ ૨

## Document Information

Text title : Yamaproktam Shivarchanopadesham 2

File name : yamaproktaMshivArchanopadesham2.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 28 madhyArjunamahimAnuvarNanam | 333-359||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

Yamaproktam Shivarchanopadesham 2

# યમપ્રોક્તં શિવાર્ચનોપદેશમ્ ૨

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

યમ ઉવાચ ।

યઃ પૂજયતિ યત્નેન સ શિવો ભવતિ ધ્રુવમ્ ।
વિના યજ્ઞૈર્વિના દાનૈસ્તપોભિશ્ચ વિના શિવમ્ ॥ ૩૩૩॥

સમ્પૂજ્ય બિલ્વપત્રેણ પ્રાપ્તાનન્દાઃ શિવાઃ ધ્રુવમ્ ।
અનન્તાન્યપિ પાપાનિ નશ્યન્તિ શિવપૂજયા ॥ ૩૩૪॥

તતઃ પ્રયાતિ ચ શિવં તયૈવ શિવપૂજયા ।
અનન્તોત્તમગોદાનભૂદાનાનાં ચ યત્ફલમ્ ॥ ૩૩૫॥

તતોઽનન્તગુણં પુણ્યં શિવપૂજાવિધેઃ ફલમ્ ।
અનન્તમત્તમાતઙ્ગદાનાનામપિ યત્ફલમ્ ॥ ૩૩૬॥

તતોઽનન્તગુણં પુણ્યં શિવપૂજાવિધેઃ ફલમ્ ।
શિવપૂજાકલ્પવૃક્ષઃ સ્વેષ્ટાનન્તફલપ્રદઃ ॥ ૩૩૭॥

તતઃ સા સર્વદા કાર્યા શિવપૂજાં મુમુક્ષુભિઃ ।
શિવાર્ચનફલં યાવત્તાવત્ફલમનેકધા ॥ ૩૩૮॥

કૃતૈરપ્યમૃ(મિ)તૈર્ધર્મૈર્નૈવ સમ્પ્રાપ્યતે ધ્રુવમ્ ।
વિનાપિ યજ્ઞદાનાદ્યૈઃ કેવલં શિવપૂજયા ॥ ૩૩૯॥

મુક્તા ભવન્તિ મનુજાસ્ત્યક્તપાતકપઞ્જરાઃ ।
પાપિનોઽપિ શિવં યાન્તિ નૂનં કૃતશિવાર્ચનાઃ ॥ ૩૪૦॥

ન તપોમૂર્તયોઽપીશં યાન્તિ ત્યક્તશિવાર્ચનાઃ ।
વૃથા તપો વૃથા દાનં ધર્માશ્ચ વિવિધા વૃથા ॥ ૩૪૧॥

કિન્ત્વેકં સાર્થકં શ્રૌતં શ્રીમહાદેવપૂજનમ્ ।
શિવે દત્તમયત્નેનાપ્યેકં બિલ્વદલં નવમ્ ॥ ૩૪૨॥

વિના ધર્માન્તરાપેક્ષાં મોક્ષદં ભવતિ ધ્રુવમ્ ।
સમ્પ્રાપ્ય મહદૈશ્વર્યમિન્દ્રત્વાદિપદાન્યાપિ ॥ ૩૪૩॥

બહુભિઃ શિવસાયુજ્યં પ્રાપ્તં શઙ્કરપૂજયા ।
સકૃદપ્યર્ચિતો ભક્ત્યા મહેશઃ કરુણાનિધિઃ ॥ ૩૪૪॥

દદાત્યતુલમૈશ્વર્યં સ્વસાયુજ્યં ચ શાશ્વતમ્ ।
સુતે પિતેવ તનુતે પ્રીતિમીશઃ સ્વપૂજકે ॥ ૩૪૫॥

તતો દદાતિ સુપ્રીતઃ શિવસ્તદ્વાઞ્છિતં ફલમ્ ।
તોયેન વિલ્વપત્રેણ પૂતેનૈકેન વા શિવમ્ ॥ ૩૪૬॥

યઃ પૂજયતિ સશ્રદ્ધં તસ્ય મુક્તિરદૂરતઃ ।
યઃ પશ્યેત્ક્રૂરયા દૃષ્ટ્યા મોહાત્ શઙ્કરપૂજકમ્ ॥ ૩૪૭॥

સ તિષ્ઠેન્નરકેઽવશ્યં યાવદાચન્દ્રતારકમ્ ।
ધન્યં ધન્યં મહાદેવં પૂજકસ્યૈવ જીવનમ્ ॥ ૩૪૮॥

યો ભુક્ત્વા વિવિધાન્ભોગાન્મુક્તિમન્તે સમશ્નુતે ।
તસ્યૈવ જનકો માન્યો યસ્ય પુત્રઃ શિવાર્ચકઃ ॥ ૩૪૯॥

તસ્યૈવ જનની માન્યા સુષુવે યા શિવાર્ચકમ્ ।
તસ્ય ધન્યતરો વંશો યન્ત્ર જાતઃ શિવાર્ચકઃ ॥ ૩૫૦॥

તદ્વંશજન્યા ધન્યા હિ યદ્વંશે શઙ્કરાર્ચકાઃ ।
નૃત્યન્તિ પિતરસ્તસ્ય યસ્ય વંશે શિવાર્ચકઃ ॥ ૩૫૧॥

કદાચિદપિ ગૌરીશં પયસા યોઽભિષિઞ્ચતિ ।
તસ્યેહ જનનીસ્તન્યં ભવિષ્યતિ સુદુર્લભમ્ ॥ ૩૫૨॥

નરા ભવન્તિ નિષ્પાપા દૃષ્ટ્વાપિ શિવપૂજકમ્ ।
અતઃ શિવાર્ચકો ધન્યો ભાગ્યવાંશ્ચ ન સંશયઃ ॥ ૩૫૩॥

શિવાર્ચનેન યલ્લભ્યં તલ્લભ્યં નાન્યધર્મતઃ ।
યદન્યધર્મતો લભ્યં તલ્લભ્યં શિવપૂજયા ॥ ૩૫૪॥

શિવાર્ચકાસ્ત્રિપુણ્ડ્રાઙ્કાઃ શિવપારિષદાઃ દોઽમલાઃ
(દાઃ શુભાઃ) ।
નમો નમઃ શામ્ભવેભ્યઃ શામ્ભવેભ્યો નમો નમઃ ॥ ૩૫૫॥

નમો નમઃ શામ્ભવેભ્યઃ પુનર્ભૂયો નમો નમઃ ।

ભુવ્યન્તરિક્ષે પાતાલે યે ભવિષ્યન્તિ શામ્ભવાઃ ॥ ૩૫૬॥

તભ્યો નમો નમો નિત્યં નમો નિત્યં નમો નમઃ ।
અસ્માભિરેતે દૃશ્યન્તે ભાગ્યેન શિવપૂજકાઃ ॥ ૩૫૭॥

ભૂરિભાગ્યં વિનાઽસ્માકં કુતઃ શામ્ભવદર્શનમ્ ।
અનન્તદાનધર્માણામનન્તતપસામપિ ॥ ૩૫૮॥

ફલં શ્રુતિશ્રુતં સાક્ષાદન્તકાલે શિવાર્ચનમ્ ।
યેન કેનાપિ રૂપેણ યસ્ય કસ્યાપિ દેહિનઃ ॥ ૩૫૯॥

યદ્યન્તે શિવપૂજા સ્યાત્સ મુક્તો ભવતિ ધ્રુવમ્ ।

॥ ઇતિ શિવરહસ્યાન્તર્ગતે યમસભાસદપ્રતિ યમપ્રોક્તં શિવાર્ચનોપદેશં ૨ સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૮ મધ્યાર્જુનમહિમાનુવર્ણનમ્ । ૩૩૩-૩૫૯॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 28 madhyArjunamahimAnuvarNan
. 333-359..

Notes:
Yama યમ; delivers Upadeśa ઉપદેશ (to Yamasabhāsada યમસભાસદ) about merits of worshiping Śiva શિવ.

Proofread by Ruma Dewan

*Yamaproktam Shivarchanopadesham 2*
pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*